National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 54-57
© 2026 NJHSR
www.sanskritarticle.com

**Dr. C. Hariharan**
Asst. Prof. M.A Sanskrit
& Director Digital Campus,
The Madras Sanskrit College

**Correspondence:**
**Dr. C. Hariharan**
Asst. Prof. M.A Sanskrit
& Director Digital Campus,
The Madras Sanskrit College

# ग्रन्थान्तरतुलनया कुमारसम्भवीयः प्रतिनायकपरिचयः

**Dr. C. Hariharan**

**उपोद्घातः**

यस्मिन् कस्मिन्नपि काव्ये नायकविषयिणी उत्कर्षबुद्धिः प्रतिनायकस्य उत्कर्षवर्णनानुसारेण भवतीत्ययं विषयस्तावत् विदितचरः एव। यतो हि सामान्यस्य क्षुद्रस्य जयेन नायकः न विशिष्यते प्रत्युत पराक्रमयुक्तस्य, सकलैश्वर्यसम्पन्नस्य जयः वर्ण्यते चेदेव नायकः काव्ये विशिष्यते। तत्रापि विशिष्य कुमारसम्भवे प्रतिनायकस्य लोकोत्तर-पराक्रमः वर्णनीय एव भवति। यतः नायकस्य भगवतः स्कन्दस्य लोकोत्तरप्रभावशालित्वम् अवर्णितमपि स्वीकार्यमेव भवति यतः तज्जनकजनन्योः जगत्पितृत्वात् । एवं स्थिते रामायणापेक्षयापि प्रतिनायकप्रभाववर्णने अधिक एव आग्रहः कविना कर्तव्यो भवति। अत एव कविः कालिदासः प्रतिनायकवर्णने प्रायेण वाल्मीकीयं रामायणम् आदर्शरूपेण स्वीकृतवानिति द्वितीयसर्गस्थस्य तारकासुरवर्णनांशस्य पर्यवेक्षणेन प्रतिभाति।

**प्रतिज्ञा**

तदत्र काव्यान्तरापेक्षया अस्य च महाकाव्यस्य पर्यवेक्षणेन यत्तावत् साधर्म्यं वैधर्म्यञ्च प्रतिभाति तस्य सङ्ग्रहात्मकः अयं लेखः भवतीति प्रतिज्ञायते।

"[1]**मधुमयभणितीनां मार्गदर्शी महर्षिः**" इति वचनानुसारं आदिकविः वाल्मिकिः सर्वेषामपि कविवर्याणां आदर्शभूतः इति कृत्वा श्रीमद्वाल्मीकिरामायणेन एवं तन्मूलकेन चम्पूरामयणग्रन्थेन च तुलनां कृत्वा अयं तुलनात्मकः प्रबन्धः कश्चन विरच्यते। तत्र यद्यपि प्रतियोगिभूतयोः रामायणग्रन्थयोः कुमारसम्भवे च प्रतिनायकवर्णनं अन्यत्र सर्गेषु युद्धादिवर्णनावसरे विस्तृततया कृतमेव स्यात् तथापि सर्वादौ प्रतिनायकस्य परिचयः यत्र ऐदम्प्राथम्येन क्रियते तत्स्थलमादायैव प्रायेण मदीयः विचारः प्रवर्तितः इति निवेद्यते।

**विषयः**

श्रीमद्वाल्मीकीये आदिकाव्ये बालकाण्डस्य पञ्चदशे सर्गे दशरथकर्तृकायां पुत्रकामेष्टौ हविर्भागस्वीकाराय समागताः देवाः, सिद्धाः महर्षयश्च ब्रह्मदेवं दृष्ट्वा रावणस्य पराक्रमं वर्णयन्तः रावणप्रयुक्तां पीडां चतुर्मुखाय निवेदयामासुः।

"[2]**ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।**
**भागप्रतिग्रहार्थं वै समवेता यथाविधि॥**
**ताः समेत्य यथान्यायं तस्मिन् सदसि देवताः।**
**अब्रुवन् लोककर्तारं ब्रह्माणं वचनं महत्॥**"

अत्र च वाल्मीकिरामयणे न केवलं देवाः प्रतिनायकपीडां निवेदयन्ति अपि तु सिद्धाः ऋषयश्च तान्निवेदयन्तीति कुमरसम्भवापेक्षया विशेषः।

कुमारसम्भवाख्येऽपि महाकाव्ये, द्वितीयसर्गे तारकासुरप्रभावपीडिताः देवाः ब्रह्मलोकं प्राप्य चतुर्मुखाय प्रतिनायकीभूततारकासुरप्रयुक्तान् स्वक्लेशान्निवेदयन्तीति दृश्यते,

[3]"**तस्मिन्विप्रकृताः काले तारकेण दिवौकसः।**

**तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः॥**"

ततश्च उभयत्रापि देवकर्तृकं क्रमेण राक्षस-असुरपीडानिवेदनम् इति साधर्म्यं देवब्रह्ममेलञ्च दशरथस्य यागे इति रामायणे अन्यत्र ब्रह्मलोके इति वैधर्म्यम्।

तारकासुरस्य प्रभावः तावत् कुमारसम्भवे इत्थं आरभ्यते,

[4]"**भवल्लब्धवरोदीर्णस्तारकाख्यो महासुरः।**

**उपप्लवाय लोकानां धूमकेतुरिवोत्थितः॥**"

अत्र भवच्छब्देन ब्रह्मा स्वीकार्य तेन यद्वरदानं कृतं तद्वशादेव तारकसुरेण ईदृग्विधः प्रभावः सम्प्राप्तः इति। एवं, एतत्समानार्थकः एव श्लोकः वाल्मीकिरामायणे अपि द्रष्टुं शक्यते। तत्र हि,

[5]**त्वया तस्मै वरो दत्तः प्रीतेन भगवन् पुरा।**

**मानयन्तश्च तं नित्यं तं नित्यं सर्वं तस्य क्षमामहे॥** इति।

अत्रोभयत्रापि ब्रह्मणाकृतेन वरप्रदानेन एव प्रतिनायकेन प्रभावः प्राप्तः इति साधर्म्यं स्पष्टमेव ज्ञायते।

किञ्च उभयत्रापि प्रतिनायकः कथं देवानां पीडनं करोति इति वर्णनम् अनुपदमेव प्रदर्श्यते, तत्र कुमारसम्भवे यथा,

"[6]**पुरे तावन्तमेवास्य तनोति रविरातपम्।**

**दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते॥**"

इति महाप्रभवशाली सूर्योऽपि तारकासुरसन्निधौ कमलविकासार्थम-पेक्षितकिरणानि दत्वा स्वकीयानि क्रूरकिरणानि उपसंहरति न तु चेन्नैनगरे इव तान्युपयुज्य दहति इति वर्ण्यते। स एव विषयः वाल्मीकिरामायणे श्लोकस्य पादांशेन सुनिरूपितः वर्तते, [7]"**नैनं सूर्यः प्रतपति**" इति।

अत्र च कुमारसम्भवस्य आदर्शभूते वाल्मीकिरामायणे प्रतिनायकेन क्रियमाणा सूर्यदेवस्य पीडा श्लोकस्य पादांशेनैव सूचिता। तत्र विस्तृतं वर्णनं किमपि नास्ति। किन्तु कुमारसम्भवे कविः एकेन पूर्णेनैव श्लोकेन तद्वर्णितवानिति अयमवधेयः अंशः। चम्पूरामायणे अयमेव विषयः विस्तृततया व्याख्यातः। तत्र हि रावणकृतं सूर्यदेवपीडनमित्थं वर्णितम्

[8]"**सोऽयं कदाचित्क्रीडधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां संचरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान्संहस्र-भानुरापि संकुचितभानुरेव तत्सानूनि नूनं संश्रयते**"

अस्य गद्यांशस्य अयमर्थः,

अयञ्च विषयः आगामि वर्णणेष्वपि अस्माभिः द्रष्टुं शक्यते। यथा वायोः क्लेशः वल्मीकिरामायणे "[9]**पार्श्वे वाति न मारुतः**" इति सङ्क्षेपेण कुमारसम्भवे तु किञ्चिद्विस्तृततया,

"[10]**व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात्।**

**न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्॥**"

इति वर्णितं दरीदृश्यते। अस्यायमर्थः यत् वायुदेवः तारकासुरस्य उद्यानवृक्षस्थितानि कुसुमानि स्ववेगेन पतन्ति चेदहं तत्कोपपात्रं भवेयमिति भीतभीतः मन्दमन्दं वाति इति। चम्पूरामायणे ऽपि

[11]"**तेन पुलस्त्यनन्दनेन संक्रन्दननन्दनात्स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दी-वरद्वन्द्वाञ्च करारविन्दकलितकनककलशाञ्च मन्दोष्णं स्यदमानैरम्बु-भिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमा-शङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवा न भवन्ति**"

अत्रान्यः कश्चन अवधेयांशः भवति यत् न केवलं देवाः प्रतिनायकेन पीड्यन्ते अपि तु स्वर्लोकसुन्दर्यः अप्सरस्त्रियः अपि तत्र अन्तर्भूताः इति चम्पूरामायणगतेन अनेन गद्यांशेन ज्ञातुं शक्यते। कुमारसम्भवे अपि अप्सरस्त्रियः प्रतिनायककृतपीडाविषयाः इति वर्णितमेव अस्ति किञ्चिदग्रे।

[12]"**तेनामरवधूहस्तैः सदयालूनपल्लवाः।**

**अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः॥**

**वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः।**

**चामरैः सुरबन्दीनां बाष्पशीकरवर्षिभिः॥**"

इति श्लोकद्वयेन।

समुद्रराजस्य रावणाख्यप्रतिनायकतः भयं कीदृशमासीदिति वाल्मीकिरामायणे एवं वर्णितमस्ति,

"[13]**चलोर्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते**"

इति श्लोकार्धेन। कुमारसम्भवे तु समुद्रराजः प्रतिनायकं तारकासुरं कथमुपचरति इति वर्ण्यते,

**"[14]तस्योपायनयोग्यानि रत्नानि सरितां पतिः।**

**कथमप्यम्भसामन्तरानिष्पत्तेः प्रतीक्षते॥"**

इति। अस्यार्थः यत् समुद्रराजः तारकासुराय स्वीयानि रत्नानि उपायनरूपेण स्वयं समर्पयति। तत्समर्पणाय च अत्युत्तमानि एव रत्नानि योग्यानि इति तादृशरत्नोत्पत्तिसमयं प्रतीक्षमाणः तिष्ठति इति। रावणविषये समुद्रराजस्य भयं कथमासीदिति चम्पूरामायणे न वर्णितम्।

प्रत्युत चम्पूरामायणे चन्द्रदेवस्य प्रतिनायकभूताद्रावणाद्भयं कथमासीदिति कुमारसम्भवापेक्षयापि अतिविशेषतः वर्णितमस्ति, तद्यथा,

**[15]"एष मृगाङ्कोऽपि मृगयायास-परिश्रान्ति-विश्रान्त्यै ससंभ्रमं नमज्जनपरिवृते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतरशातकुम्भ-स्तम्भाग्र-प्रत्यग्र- प्रत्युप्त- स्फटिकशिला- शाल- भञ्जिकापुञ्ज- करतल-कलित-निजोपलमय-कलशमुखादच्छाच्छ- मविच्छिन्नधारामम्बुधारां निजकराभिमर्शादापादयंस्तस्य प्रसाद-पिशुनानां शुनासीर-चिर-काङ्क्षितानां विंशतिविध-वीक्षणानां क्षणमात्रं पात्रं भवति।"**

इति। अस्यार्थः मृगयाम् क्रीडित्वा परिश्रान्तः रावणः परिजनैः सेव्यमानः चन्द्रकान्तमणिमण्डिते मण्डपे श्रमपरिहाराय स्नानार्थमागच्छति। तत्र च चन्द्रः स्वीयकिरणैः तत्स्नानमण्डपं जलपूर्णं कुर्वन् रावणस्य कटाक्षपात्रं भवति इति। कुमारसम्भवे तु प्रतिनायकः चन्द्रदेवं कथं पीडितवानिति वर्णनं एतदपेक्षया किञ्चिल्लघुभूतमेव वर्तते यथा,

**[16]"सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते।**

**नादत्ते केवलां लेखां हरचूडामणीकृताम्॥"**

इति। अस्यार्थः एवमस्ति, चन्द्रदेवः सर्वदा पूर्णकलायुक्तः एव तारकासुरं सेवते। न तु लेखारूपाभिः अन्याभिः कलाभिः युक्तः तस्य दृष्टिपथमायाति इति। अनेन अन्यदपि सूच्यते यत् परमेश्वरः असम्पूर्णमपि चन्द्रं आभरणरूपेण धरति इति तत् परमेश्वरस्य औदार्यं प्रकटयति। प्रतिनायकः तारकासुरः तु तन्न सहते इति तद्गता असन्तृप्तिः सूचिता भवति।

अपि च,

**[17]"पर्यायसेवामुत्सृज्य पुष्पसम्भारतत्पराः।**

**उद्यानपालसामान्यमृतवस्तमुपासते॥"**

इति ऋतुदेवताः सर्वासु ऋतुषु यावन्ति कुसुमानि तानि सर्वाण्यपि एककालावच्छेदेन प्रतिनायकाय तारकासुराय समर्पयन्त्यः तारकासुरस्य सेवां कृतवत्यः इति कुमारसम्भवे वर्णितमस्ति। तद्विषये भोजीये रामायणे न किमपि वर्णनं दृश्यते। वाल्मीकीये रामायणे तु सुन्दरकाडस्य पञ्चदशसर्गे, अशोकवनं प्राप्तः हनूमान् यदा तत्र सीतादेव्याः अन्वेषणं करोति, तदा इत्थं वर्णितमस्ति,

**[18]"सर्वर्तुकुसुमैरम्यां फलवद्भिश्च पादपैः।**

**पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम्॥**

इति उल्लेखः कृतः वर्तते। तेन च रावणप्रभावभीताः ऋतुदेवताः सर्वासु ऋतुषु यानि पुष्पाणि तानि युगपद्यच्छन्त्यः अशोकवनस्य शोभामवर्धयन् इति ज्ञातुं शक्नुमः। तथा च यद्यपि नायकस्य सर्वाद्ये परिचये अयं विषयः भगवता वाल्मीकिना नानीतः तथापि अन्यत्र सः प्रभावः वर्णितः इति ज्ञातुं शक्नुमः।

कुमारसम्भवे न केवलं देवाः अपि तु नागाः अपि तारकासुरकृतां पीडां सहमानाः वर्तन्त इति निरूपितमस्ति। तद्यथा

**[19] "ज्वलन्मणिशिखाश्चैनं वासुकिप्रमुखा निशि।**

**स्थिरप्रदीपतामेत्य भुजङ्गाः पर्युपासते॥"**

अस्यार्थः नागराजाः वासुकिप्रमुखाः स्वशिरस्सु विद्यमानानि नागरत्नानि उपयुज्य रात्रौ प्रतिनायकस्य तारकासुरस्य प्रकाशसेवां कुर्वन्तः क्लेशमनुभवन्ति इति। इदञ्च पद्यं समद्रराजस्य परिस्थितिवर्णनात्मकात् अष्टात्रिंशपद्यादग्रिमम्। अर्थात् एकोनचत्वारिंशं पद्यम्। अनेन च कविना प्रतिनायककृत दुष्कृत्येषु क्रमेण प्रगतिः अपि सूच्यते्। तथा हि समुद्रराजः तावत् स्वसकाशात् रत्नानि समर्प्य ततोप्युत्कृष्ट-रत्नसमर्पणाय प्रतीक्षामकरोत् इति तस्य परिस्थितिः। फाणीन्द्राणां वासुकिप्रभृतीनां तु स्वशिरसि रत्नं वर्तते इति कारणतः आरात्रि तारकासुरस्य सन्निधौ स्थित्वा सेवा कर्तव्येति परिस्थितिः समुद्रराजापेक्षाया क्लिष्टतरा सम्पन्ना इति।

एवं तारकासुर प्रयुक्तां पीडामिन्द्रदेवः सकलदेवानां राजा कथमन्वभवदिति कालिदासः इत्थं वर्णयति,

**[20]"तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः।**

**अनुकूलयतीन्द्रो ऽपि कल्पद्रुमविभूषणैः॥"**

अस्यार्थः इन्द्रोपि तरकासुरानुग्रहापेक्षी सञ्जात इति। एतत्समानार्थकः गद्यांशः चम्पूरामायणे वर्तते। स च पूर्वं चन्द्रदेवस्य पीडावर्णनावसरे

उल्लिखितः **शुनासीर-चिरकाङ्क्षितानां विंशतिविध-वीक्षणानां क्षणमात्रं पात्रं भवति।** इति शुनासीरः = इन्द्रः तस्यापि चिरकाङ्क्षितं वीक्षणम् दशमुखस्य इति तत्र अर्थः।

एवमेव सर्वदेवानां समुच्चित्य ये क्लेशाः अनुभूयन्ते तान्

[21]**उत्पाट्य मेरुशृङ्गाणि क्षुण्णानि हरितां खुरैः।**

**आक्रीडपर्वतास्तेन कल्पिताः स्वेषु वेश्मसु॥**

इत्यादिना श्लोकेन उक्त्वा अन्यानि च कानिचन दुष्कृत्यानि, धर्ममार्गस्य विनाशनपराणि

[22] **मन्दाकिन्याः पयःशेषं दिग्वारणमदाविलम्।**

**हेमाम्भोरुहसस्यानां तद्वाप्यो धाम साम्प्रतम्॥**

**भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।**

**खिलीभूते विमानानां तदापातभयात्पथि॥**

**यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः।**

**जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः॥**

इत्यादिश्लोकैः उपवर्ण्य तादृशस्य प्रतिनायकस्य संहाराय जगन्मातुः पराशक्तेः तथा जगत्पितुः परमेश्वरस्य च अंशसंयुक्तः लोकोत्तरपराक्रमशाली सेनापतिः अपेक्षितः इति देवाः ब्रह्मणः निकटे प्रर्थयन्ते इति शम्।

**Abbreviations:**

1. चं. रा. बा. का = चम्पूरामायणस्य बालकाण्डे
2. वा.रा. बा. का = वाल्मीकीयरामायणे बालकाण्डे
3. कु. सं = कुमारसम्भवे
4. वा.रा. सु. का = वाल्मीकिरामायणस्य सुन्दरकाण्डे

**References**

1. Kumarasambhavam: sanskritdocuments.org, link:
https://sanskritdocuments.org/sites/giirvaani/giirvaani/ks/sarga/02_ks.htm
2. Valmiki Ramayanam published by VIGNESWARA VENKATESWARA TRUST September 2007 edition (Hard Copy).
3. Champu-Ramayana published by Tukaram Javaji, source: archive.org, link:
https://archive.org/details/in.ernet.dli.2015.347687/mode/2up

**End Note**

[1]चं. रा. बा. का श्लोकसङ्ख्या 8

[2]वा.रा. बा. का 15 सर्गे श्लोकाः 5 & 6

[3]कु. सं 2 सर्गे श्लोकसङ्ख्या 1

[4]कु. सं 2 सर्गे श्लोकसङ्ख्या 32

[5]वाल्मीकीयरामायणे बालकाण्डे श्लोकाः

[6]कु. सं 2 सर्गे श्लोकसङ्ख्या 33

[7]वा.रा. बा. का 15 सर्गे 10 श्लोके

[8]चं. रा. बा. का गद्यांशः 21 श्लोकोत्तरः

[9]वा.रा. बा. का 15 सर्गे 10 श्लोके

[10]कु. सं 2 सर्गे श्लोकसङ्ख्या 35

[11]चं. रा. बा. का गद्यांशः 21 श्लोकोत्तरः

[12]कु. सं 2 सर्गे श्लोकसङ्ख्या 41 & 42

[13]वा.रा. बा. का 15 सर्गे 10 श्लोके

[14]कु. सं 2 सर्गे श्लोकसङ्ख्या 37

[15]चं. रा. बा. का गद्यांशः 21 श्लोकोत्तरः

[16]कु. सं 2 सर्गे श्लोकसङ्ख्या 34

[17]कु. सं 2 सर्गे श्लोकसङ्ख्या 34

[18]वा. रा. सु 15 सर्गे श्लोकसङ्ख्या 5

[19]कु. सं 2 सर्गे श्लोकसङ्ख्या 38

[20]कु. सं 2 सर्गे श्लोकसङ्ख्या 39

[21]कु. सं 2 सर्गे श्लोकसङ्ख्या 43

[22]कु. सं 2 सर्गे श्लोकसङ्ख्या 43 - 46